National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(48): 19-22
© 2023 NJHSR
www.sanskritarticle.com

**बदरीनाथ बळ्ळारि**
शोधार्थी, द्वैतवेदान्त विभागः,
अतिथि उपन्यासकः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**बदरीनाथ बळ्ळारि**
शोधार्थी, द्वैतवेदान्त विभागः,
अतिथि उपन्यासकः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# द्वैतभावनाविकासः

**बदरीनाथ बळ्ळारि**

## सारांश -

किन्नाम द्वैतम् ? तथा तद्वैशिष्ट्यमपि किम् ?

द्वैतवेदान्तदर्शनमधिजिगीषवन्त इदंप्रथमतः द्वैतपदार्थमवश्यं जानीयांसः। तत् द्वैतदर्शनमिति कथयन्ति सामान्यतः, यत् श्रीमन्मध्वाचार्योपदिष्टं दर्शनम्। केचन मनीषिणः मध्वानुयायिनोऽपि द्वैतमिति यत् पदं तत् मध्वोपदिष्टदर्शनं पूर्णतया न ज्ञापयितुं समर्थमिति अभिप्रयन्ति। तेषां अभिमतानुसारेण संस्कृत-आङ्ग्लभाषायां द्वैतशब्दः, तत्पर्यायेण व्यवह्रीयमाणः “ड्यूयलिसं” इति शब्दश्च परम्परगतं यादृशं अर्थं बोधयतः, तादृश आधुनिक-प्राचीनविचारपद्धत्या निश्चितः संकेतितोऽपि मध्वाचार्यवादसरीणीव्याख्याने सत्यतः दूरं अधिययौ। अत एव अविचारितमानसाः ते श्रीमन्मध्वाचार्याणां दार्शिनिकवादस्य कार्त्स्न्येन अविचारितवन्तः अबुभुत्सितवन्तश्च आधुनिकाः स्वगोष्ठ्यां “निष्प्रयोजकोऽयं द्वैतवादः” इति उपेक्षाञ्चक्रिरे इति यत् दुरदृष्टकरम्।

पाश्चात्त्य-दार्शनिकविचारपद्धत्या द्वैतपदं युगलं, स्वतन्त्रं, तथा समीकृतत्त्वाङ्गीकारवादमिति वा बोधयतीति सम्भावयन्ति। भारतीयदार्शनिकप्रपञ्चे सांख्योक्तं यत् लक्षणं तत् अनतिदूरं भाति। श्रीमन्मध्वाचार्याः परस्परं समीकृतं सत्यभूतं तत्त्वद्वयं द्वैतपदबोध्यं वदन्तः सन्तः, तयोर्मध्ये एकं स्वतन्त्रं भगवन्तमेव तत्त्वं, अपरं अस्वतन्त्रमिति अङ्गीचक्रुः । भगवान् एक एव स्वतन्त्रः अथ वा परतत्त्वं तथा अन्यत् सर्वं परिमितं प्रकृति-पुरुष-काल-कर्म-स्वभावादिजातं परतन्त्रमिति प्रत्यपीपदन्। जीवनाडीवत् मध्वदर्शने स्वतन्त्र-अस्वतन्त्रतत्त्वे विद्येते । तच्चोक्तं - **“स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्त्वमिष्यते”** इति तत्त्वसंख्याने।

[1] केचन आधुनिकाः प्रलपन्ति, पाश्चत्त्यतत्त्वशास्त्रेषु द्वैतं न दार्शनिकतां लभते। यतो हि परस्परं नित्य-विरोधि-सत्याङ्गीकार अस्तीति, तन्न। मध्वोक्ताभिप्रायानवगमदुरवस्थावतां आक्षेपोऽयम् । न वस्तुतत्त्वं अपलपितुं ईष्टे। नोक्तं मध्वमुनिना विरुद्धं तत्त्वद्वैविद्ध्यमित्यादि, येन विरोधशङ्का स्यात्। किन्तु परमार्थतः तत्त्वं द्विविधं अङ्गीकृत्य तयोर्मध्ये तारतम्यमपि प्रदर्श्य परिमितं सर्वमपि अस्वतन्त्रान्तर्भूतं, तथा स्व-स्वरूप-प्रवृत्ति-प्रतीति-सत्तात्रैविध्ये स्वतन्त्रतत्त्वभूत-भगवतः अधीनमिति प्रत्यपीपदन्। अयमेव विषयः जयतीर्थश्रीमच्चरणेन स्फुटं प्रत्यपादि। तत्त्वसंख्यानटीकायां – **स्वरूपप्रमितिप्रवृत्तिलक्षण-सत्तात्रैविध्ये परानपेक्षं स्वतन्त्रम् । परापेक्षम् परतन्त्रम् इति ।**

एवं स्पष्टतमं द्वैतदर्शनविदः समीचीनतया स्वाभिप्रायं प्रतिपादयन्ति। तथापि केचन आधुनिकाः श्रीमन्मध्वभगवत्पादभावानभिज्ञाः “निरर्थकोऽयं द्वैतसिद्धान्तः” इति वृथाक्रोशन्ति। ते तु सद्भिरुपेक्षणीयाः ।

एवञ्च द्वैताधिजिगीषवः आधुनिकवातानलप्रभावेन अन्यथा-मतिमन्तः यथा न भवेयुः तथा द्वैतप्रमेयं यथावत्तया जानीयांसः।

**कूटशब्दाः :-**

1. द्वैतम् नाम किम्
2. द्वैतस्य वैशिष्ट्यं
3. स्वतन्त्रम्
4. अस्वतन्त्रम्
5. निरर्थकोऽयं द्वैतसिद्धान्तः

**द्वैतमतस्थापकाचार्याः**

श्रीमदानन्दतीर्थमुनिवर्या एव द्वैतमतस्थापकाचार्याः रजतपीठ-पुरसमीपस्थपाजकक्षेत्रे वेदवतीनारायणभट्ट (मध्यगेहभट्ट) दम्पत्योः सुपुत्रत्वेन त्रयोदशशतके अजायत। ते वायुदेवस्य तृतीयावतारत्वेन साम्प्रदायिकैःअभिज्ञायन्ते। बाल्ये एव ते प्रतिभादिसद्गुणसम्पन्ना आसन्निति श्रूयते। श्रीअच्युतप्रेक्षगुरुणा ते सन्यासाश्रमस्वी-करणानन्तरं कर्णाटराज्ये दक्षिणकन्नडमण्डले उडुपि इति प्रसिद्धात् रजतपीठपुरात् दक्षिणदिशि बेळळे इति ग्रामे बृहद्भिः पाशाणैः आवृते अत एव पाजक इति प्रसिद्धे प्रकृतिरम्ये ग्रामे नडिल्लाय नारायण-वेदवती (प्रायशः) दम्पत्योः एकैकपुत्रत्वेन श्रीमदाचार्याः अवततरुः। तदा कलियुगारम्भात् ४३३८ संवत्सराः अतीताः ३९ तमः विलम्बिसंवत्सरः प्रवर्तमानः आसीत्। (क्रि.श.१२३८) आश्वयुजशुक्लदशमीमध्याह्ने सञ्जातस्य स्वपुत्रस्य नारायणभट्टः वासुदेव इति नामसंस्कारं चकार। बाल्ये एव प्रतिभावान् आसीदयम्। अपि च वैराग्यादिभिः अध्यात्मयोग्यगुणैः युक्तश्च आसीत्। एतादृशगुणयुक्ताय ब्रह्मचारिणे सौम्यसंवस्तरे शुभदिने रजतपीठपुरे तदानीम् अच्युतप्रज्ञ(अच्युतप्रेक्ष) इति प्रसिद्धेन यतिना सन्न्यासाश्रमो दतः। सन्न्यासिनेऽस्मै पूर्णप्रज्ञ इति नाम कृतम्॥ एतद्विचारे अणुमध्वचरितग्रन्थे प्रमाणमस्ति यत्

**त्रिशताब्दोत्तरचतुस्सहस्राब्देभ्य उत्तरे।**
**एकोनचत्वारिंशाब्दे विलम्बिपरिवत्सरे।**
**आश्वीनशुक्लदशमीदिवसे भुविपावने।**
**पाजकाख्ये शुचिक्षेत्रे दुर्गया चाभिवीक्षिते।**
**जातो मध्याह्नवेलायां बुधवारे मरुत्तनुः॥**[2]

अपि च श्रीमदाचार्यवर्यैरेव महाभारततात्पर्यनिर्णयेऽस्मिन् विषये उक्तं यत्

**चतुस्सहस्रे त्रिशतोत्तरे गते**
**संवत्सराणां तु कलौ पृथिव्यां।**
**जातः पुनर्विप्रतनुः सभीमः**
**दैत्यैर्निगूढं हरितत्वमाह॥**[3]

बाल्ये एव ते (एकादशे वयसि) वासुदेवपण्डितनामकं महान्तं वादार्थम् रजतपीठपुरम् आगतं वादे पराजित्य गुर्वचुतप्रज्ञैः आनन्दतीर्थ इति नाम प्राप्तवन्तः। पुनस्ते बौद्धविद्वांसं वादिसिंहेन सहागतं बुद्धिसागरनामानं वादे निरुत्तरं कृत्वा स्वगुर्वादीन् सर्वान् समतोषयत् आनन्दतीर्थनामापि अन्वर्थकमभवत्। एवं च वासुदेवः पूर्णप्रज्ञोऽभवत्, पूर्णप्रज्ञस्तु आनन्दतीर्थोऽभवत्। आनन्दतीर्थो मध्वोऽभवत्। एतत्तु वेदोक्तमरुन्ना- मास्ति यत् **मध्वो वा नाम मारुतं यजत्राः प्र- यज्ञेषु शवसा मदन्ति।**[4] एतन्नाम तेषां वैदिकं काव्यनामाप्यस्ति इति वक्तुं शक्यते॥ पूर्णप्रज्ञनामापि वेदोक्तमेव यथा वेदे-

**प्रक्षो वपुः पितुमान्नित्य आशये द्वितीयमा सप्त शिवासु मातृषु।**
**तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः॥**[5]

अत्र **दशप्रमतिर्नाम पूर्णप्रज्ञ** इति दश, शत, सहस्रादयः शब्दाः पूर्णत्वद्योतकाः इति प्रमाणसत्वात्॥ तत आचार्यवर्याः दक्षिणभारत-यात्रां कृतवन्तः। तदा अनन्तशयन, कन्याकुमारी, श्रीरङ्गं प्रभृतीनि पुण्यक्षेत्राणि सन्दर्शितवन्तः तत्ववादप्रचारमपि कृतवन्तः। ततो निर्गत्य पुनरुडुपिपत्तनमागत्य गीताभाष्यं रचितवन्तः। पुनः तत्वप्रचारादिकं कर्तुं उत्तरभारतयात्रां कृतवन्तस्ते गीताभाष्यं वेदव्यासाय समर्पयितुं व्यासबदरीम् गत्वा ततो निवृत्य ब्रह्मसूत्रभाष्यं रचितवन्तः। ग्रन्थलेखनं सत्यतीर्थादिभिः स्वशिष्यैरेव कारितं च। आचार्यवर्याणां तत्ववादप्रचारेण बहवो तच्छिष्यत्वम् अंगीकृत्य सर्वत्र (बहुत्र) तत्ववादप्रचारं कृतवन्तः। दिग्विजयानन्तरं बहुभिः शिष्यसमूहैः आगतान् आचार्यवर्यान् दृष्ट्वा अच्युतप्रज्ञाः स्वानन्दयुक्ता अभवन् ॥ अपि च तत्ववादे पूर्णश्रद्धां दत्तवन्तश्चासन्॥ ततश्च किञ्चित्कालपर्यन्तं रजतपीठपुरे एव सन्तस्ते दशोपनिषदां भाष्यरचनां कृतवन्तः। वेदानाम् अध्यात्ममुखदर्शनार्थं ते ऋग्वेदसंहितायाः चत्वारिंशत्सूक्तानां भाष्यमपि रचितवन्तः। पुराणग्रन्थानां मौल्यं दर्शयितुं भागवततात्पर्यमिति ग्रन्थमेकं रचयित्वा (विरच्य) बहूपकारम् अध्यात्मनिष्ठावद्भ्यः कृतवन्तः। एतावदेव न, इतोऽप्यधिकलोकोपयुक्तान् ग्रन्थान् ते रचयामासुः तेषु केचन एव अधुना उपलभ्यन्ते न सर्वेऽपि।

अस्मिन्नेव काले ते पश्चिमसमुद्रे लब्धश्रीकृष्णप्रतिमां उडुपिपुरे प्रतिष्ठाप्य अष्टमठान् स्थापयित्वा अष्टशिष्यान् पर्यायक्रमेण तदर्चनार्थं स्वमतप्रचारप्रसारार्थं च नियम्य द्वितीयवारं बदरीयात्रां चक्रुः॥ बदर्यां नारायणदर्शनं व्यासदर्शनं च कृत्वा महाभारततात्पर्यनिर्णयं नाम ग्रन्थरत्नं रचयामासुः। ततो निर्गमनवेलायां काशीमध्ये अद्वैतविद्वांसम् अमरेन्द्रपुरिनामानं पराजयामासुः। ततः कुरुक्षेत्रमागत्य तत्र भूम्यन्तस्थितभीमसेनगदां

दर्शयामासुः, एवं स्ववाय्वंशवत्वं समर्थितवन्तः। बदरीयात्रातः निर्गमनवेलायां गोदावरीतीरस्य एकस्मिन् तीर्थक्षेत्रे वर्तमानवेलायां प्रकाण्डपण्डितः शोभनभट्टनामैकः आचार्यप्रभावेन तच्छिष्यवृत्तिं स्वीकृत्य पद्मनाभतीर्थाः इति नाम्ना नैकेषां माध्वतत्त्वप्रसारकेन्द्राणां परम्पराकारणमभवत् मध्वमतप्रसारे अतिप्रमुखपात्रं निरवहच्च। आचार्यवर्याः द्विवारं भारतयात्रां कृत्वा तत्ववादप्रचारं श्रद्धया कृतवन्तः विद्वद्वृन्दं स्वविशिष्टविचारशक्त्या परम् आकर्षितवन्तः। आचार्याः तावदन्तम् अज्ञातानानेकवेदभागान् उद्धृतवन्तः श्रुति-पुराणसमन्वयमपिकृतवन्तः। वैदिकवाङ्मयेऽन्तर्गतम- ध्यात्मतत्वं स्वविशिष्टविज्ञानशक्त्या सर्वेभ्योऽपि दर्शितवन्तः। येन केनापि अकृतवेदसूक्तानामध्यात्मपरार्थकम् अभूतपूर्वं भाष्यं रचयित्वा ज्ञानसूर्यं प्रकाशितवन्तः। द्वितीयावधौ बदर्या निर्गमनानन्तरम् स्वपुरे एव पुण्डरीकपुरि इत्यनेन अद्वैतयतिना सह वादे विजयं प्राप्तवन्तः। ततः अद्यतनीयकासरगोडुपुरे पद्मतीर्थयत्या सह वादजयमनुभूतवन्तः। स वाद एव वाद इति प्रसिद्धतत्वोद्योतग्रन्थोऽभवत्। आचार्यप्रसिद्धिं श्रुत्वा तौळवराजो जयसिंहः(कुम्बळेराजः)तान् स्वस्य आस्थानम् आहूय सममानयत् । राजगुरुः पेजत्तायवंशीयः त्रिविक्रमपण्डिताचार्यः आचार्यैः सह एकपक्षपर्यन्तं तत्व- सिद्धये वादं कृत्वान्ते पराजितो भूत्वा तच्छिश्यपदवीं प्राप्तवान्। प्रीत्यादराभ्यां सहैव तन्मुखतः शास्त्रश्रवणं कृत्वा सुसन्तुष्टोऽभवत् ब्रह्मसूत्रभाष्यमधिकृत्य तत्वप्रदीपिका इति असदृशीं व्याख्यां कृत्वा गुरुदक्षिणामपि प्रदत्तवान् ।

आचार्येभ्योऽपि स्ववृद्धशिष्येऽतिप्रीत्यादरा आसन्नित्येव तत्प्रार्थनानुसारं पुनः ब्रह्मसूत्रोपरि अनुव्याख्यानम् नाम श्लोकात्मकं बृहद्ग्रन्थं रचितवन्तः। चतुर्भिः शिष्यैः एकमेकमध्यायं लेखापयित्वा तानप्यनुगृहीतवन्तः। अनेन सहैव न्यायविवरणम् इत्यन्यं ग्रन्थं च विरचितवन्तः। कासरगोडुपुरे चातुर्मास्यं परिसमाप्य पाजकं प्रत्यागत्य विरक्ताय स्वानुजाय सन्न्यासदीक्षां प्रदत्तवन्तः आचार्याः ततः गोदावरीतीरस्थशोभनभट्टमहाशयायापि सन्न्यासाश्रमं दत्तवन्तः, स एव देशस्थमठानां मूलयतिः पद्मनाभतीर्थोऽभवत्। ततः आचार्यवर्याः विविधशिष्येभ्यः सन्न्यासदीक्षां दत्तवन्तः तेषु प्रसिद्धाः उडुपिमध्ये आचार्यैरेव अष्टसु मठेषु श्रीकृष्णपूजार्थं नियुक्ताः अत्रोक्ताः -

आचार्यवर्याः स्वसप्तत्यब्दसमये जनजागृतिसाधनाय तत्र तत्र धर्मसंचारं कृतवन्तः, तदा इड्य इति प्रसिद्धग्रामवासिनः एडपाडित्ताय- नामकविप्रप्रार्थनानुसारं कृष्णामृतमहार्णवमिति महान्तं ग्रन्थमेकं रचित- वन्तः। ततः उजिरे इति ग्रामं गत्वा तत्रस्थविप्रान् जागरयितुं कर्मकाण्डस्य अध्यात्ममुखं स्वप्रवचनद्वारा स्पष्टयित्वा कर्मकाण्डेऽपि स्वसामर्थ्यं प्रदर्शितवन्तः। प्रवचनोऽयमेव कर्मनिर्णय इति ग्रन्थोऽभवच्च। स्वजीवितोद्देशे परिसमाप्ते सति स्वशिष्यान् स्वकार्ये नियोजयित्वा पुनः व्यासबदरीं निर्गतवन्तः। तदा पिङ्गलसंवत्सरस्य माघशुद्धनवमी आसीत्। इयमेव मध्वनवमीति इदानीमपि आचर्यते॥

**श्रीमदाचार्यवर्यैःरचिताःमूलकृतयः-**

**श्रुतिप्रस्थानम् -**

१.ऋग्भाष्यम्

२.खण्डार्थनिर्णयः ( कर्मनिर्णयः)

**उपनिषत्प्रस्थानम्**

३.महैतरेयोपनिषद्भाष्यम्

४. बृहदारण्यकोपनिषद्भाष्यम्

५. छन्दोगोपनिषद्भाष्यम्

६. तैत्तिरीयोपनिषद्भाष्यम्

७. तलवकारोपनिषद्भाष्यम् (केनोपनिषद्भाष्यम्)

८. काठकोपनिषद्भाष्यम्

९. आथर्वणोपनिषद्भाष्यम्

१०. षट्प्रश्नोपनिशद्भाष्यम्

११. याज्ञीयमंत्रोपनिषद्भाष्यम् (ईशावास्योपनिषद्)

१२. माण्डूकोपनिषद्भाष्यम्

श्रुतिप्रस्थानेषु ऋग्वेदस्य चत्वारिंशत्सूत्राणाम् अध्यात्मपरं (विष्णुपरं) भाष्यं विरच्य मार्गदर्शनं

चक्रुः। अपि च ऐतरेय-ब्राह्मणस्य केषाञ्चित्खण्डानां तथा आरण्यकस्य महानाम्नीखण्ड-स्यापि व्याख्यानं विरच्य संहिता-ब्राह्मणारण्यकानां समन्वय-करणशैलीं दर्शयामासुः।

**सूत्रप्रस्थानं**

१३. ब्रह्मसूत्रभाष्यम्

१४. अणुभाष्यम् ( सर्वशास्त्रसंग्रहः)

१५. ब्रह्मसूत्रानुव्याख्यानम्

१६. न्यायविवरणम् ( ब्रह्मसूत्रानुव्याख्यानन्यायविवरणम् )

**गीताप्रस्थानम्**

१७. श्रीमद्भगवद्गीताभाष्यम्

१८. श्रीमद्भगवद्गीतातात्पर्यनिर्णयः

**पुराणप्रस्थानम्**

१९. महाभारततात्पर्यनिर्णयः

२०. यमकभारतम् (महाभारततात्पर्यम्)

२१. भागवततात्पर्यनिर्णयः

**प्रकरणग्रन्थाः ( नव )**
२२. विष्णुतत्वनिर्णयः
२३. तत्वोद्योतम् (वादग्रन्थः)
२४. मायावाददूषणम् ( मायावादखण्डनम् )
२५. उपाधिदूषणम्(उपाधिखण्डनम्-तत्वप्रकाशिका)
२६. मिथ्यात्वानुमानदूषणम् (मिथ्यात्वानुमानखण्डनम् )
२७. तत्वसंख्यानम्
२८. तत्वविवेकः
२९. प्रमाणलक्षणम्
३०. वादलक्षणम् ( कथालक्षणम् )

**धर्मशास्त्रसम्बन्धिग्रन्थाः**
३१.कृष्णामृतमहार्णवम्
३२. तन्त्रसारसंग्रहः
३३. सदाचारस्मृतिः
३४. जयन्तीनिर्णयः
३५. यतिप्रणवकल्पः ( ओं तत् सत् प्रणवकल्पः)

**श्रीमदाचार्यैःउपदिष्टतत्वविचारः -**

श्रीमदाचार्यवर्यैः प्रतिपादितं यत् यो हि भगवन्तं जानाति स एव जगदपि ज्ञातुमर्हति। भौतिकैः साधनैः न कदापि भगवन्तं तदुत्पन्नं जगदपि सम्पूर्णतया ज्ञातुं शक्नुयात् । अतः जगज्ज्ञानार्थं भगवज्ज्ञानम् अत्यवश्यम्। वृक्षज्ञानार्थं वृक्षमूलज्ञानमवश्यमिव। अयमेव ज्ञानयोगः। एतेन ज्ञानयोगेन जीवात्मानं भगवता सह यत् संयोजयति तदेव प्राणतत्वम्। तदेव सर्वजीवानाम् अभिमानि जीवोत्तमतत्वम्। एतस्य प्राणतत्वस्यांश एव परतत्वाविष्कारार्थं पाजकक्षेत्रे आचार्यमध्वत्वेनावततार इत्याचार्यैरेव स्वावतारोद्देश उच्यते। तत्र श्रुत्याद्यनेकप्रमाणान्यपि दत्तानि॥ नैषः ज्ञानयोगः कर्मविरोधी। एषः न कर्मत्यागं वदति। ज्ञानिनामेव ज्ञानयोगः अज्ञानिनां कर्मयोगः इत्यपि विभागः असंगतः। सहैव एतदुभयं भगवतोऽनुग्रहद्वारा मुक्तिं प्रापयति । ज्ञात्वैव कर्माचरणे सार्थक्यम्। भगवतो महिमानं ज्ञात्वैव तस्मिन् अनन्यस्नेहरूपाप्रीतिः उत्पद्यते। एतादृश्येव प्रीतिः तत्कर्तृकेऽस्मिन् जगत्यपि स्यात्। विश्वं मिथ्या (अनृतम्, असत्यं ) इति जगतोऽस्तित्वनिराकरणं भगवन्महिम्न एव निराकरणवत् । भगवतः साम्राज्यस्यास्य विश्वस्य प्रजा वयं सर्वेऽपि देवर्णिनः। ऋणपरिहारस्तु स्वधर्माचरणेनैव करणीयः। एतदेव गीतासारत्वेन आचार्यैः कथितं - स्वविहितवृत्या भक्त्या भगवदाराधनमेव परमो धर्मः तद्विरुद्धः सर्वोऽप्यधर्मः सर्वस्य भगवदधीनत्वात्। एवं च ज्ञान-कर्म-भक्तियोगसमष्टिरेव विमुक्तिं साधयतीत्याचार्याभिप्रायः॥ ज्ञानविकासार्थं न केवलं बाह्य- चक्षुरेव साधनम्। अन्तश्चक्षुरपि तत्कारणम्। अन्तश्चक्षुषः उद्घाटनं तु सद्गुरूक्तशास्त्रानुसरणादिना साधयितुं शक्यते। तदर्थम् अन्तर्मुखी च भवेत्। वेदद्रष्टृमुनीनां वचनानुसरणमेव अन्तश्चक्षुरुद्घाटने प्रमुखं साधनम्। तद्वचनदीपज्योतिरेव सत्यमार्गं सूचयति। तेनैव मार्गेण क्रमणे सत्यं लभ्यते। एतदर्थं निरन्तर शास्त्रश्रवणं - मननमनुष्ठानं - निधिध्यासनं कर्तव्यम्॥

**उपयुक्त ग्रन्थसूचि:-**

| ग्रन्थनाम | प्रकशकाः | वर्षम्/मुद्रणम् |
|---|---|---|
| द्वैतवेदान्तैताहस. डा.बि.एन्.के शर्मा १.भागे । | द्वैत-वेदान्त-अध्ययन-संशोधन केन्द्रम् | १९८६, प्रथममुद्रणम् |
| तत्वसख्यानम् | द्वैत-वेदान्त-अध्ययन-संशोधन केन्द्रम् | २०१३ |
| ಪೂರ್ಣಪ್ರಜ್ಞ ದರ್ಶನ | Smt.pushpa gururaj puranika | 2017 |
| सुमध्वविजयः | द्वैत-वेदान्त-अध्ययन-संशोधन केन्द्रम् | 2000 |
| सुमध्वविजयः | विध्याधीशस्नातकोत्त्र रसंस्कृत शोध केन्द्रं | 2003 |
| Acharya madhwa | Eshavasyam | 2017 |

**सन्दर्भ ग्रन्थः -**

[1] द्वैतवेदान्तैताहस. डा.बि.एन्.के शर्मा १.भागे ।
[2] अणुमध्वचरिते-२-४
[3] म-भा-ता-नि-३२-१२०
[4] ऋ.म. ७-५७-१
[5] ब्र.सू. १-१४१-२